मैत्रावरुणप्रतिप्रस्थातृब्राह्मणाच्छंसिप्रस्तोतारस्तदर्द्धेन२४ मुख्यभागार्द्धेनार्द्धिनोऽर्द्धग्राहिणः, तृतीयिनोऽच्छावाकाग्नीध्रोन्नेतृप्रतिहर्त्तारो मुख्यभागस्य तृतीयांश१६भाजः। पादिनोऽन्त्याः ग्रावस्तोतृपोतृनेष्टृसुब्रह्मण्याख्या मुख्यभागस्य चतुर्थांश१२ग्राहिण इत्यर्थः। मुख्यानां चतुर्णां मिथोविभागस्तु समः एवं द्वितीयादीनामपि स एव विभागः। तथा च गोशतं दक्षिणेति पक्षमाश्रित्य कात्यायनसूत्रम् "द्वादश द्वादश मुख्येभ्यः षट् षट् द्वितीयेभ्यश्चतस्रश्चतस्रस्तृतीयेभ्यस्तिस्रस्तिस्र इतरेभ्यः" इति। संगृहीतमेतद्बौधायनकारिकायामपि "पञ्चविंशतिधा कृत्वा वर्णीया दक्षिणा क्रमात्। द्वादशैवाथ षट्कं च चतस्रस्तिस्र एव चेति" द्वादशाधिकगोशतरूपाया दक्षिणायाः प्रथमञ्चत्वारो भागाः कर्त्तव्याः। तत्रैको भागो होतृवर्गस्यापरो भागो ब्रह्मवर्गस्यापरोऽध्वर्युवर्गस्यापर उद्गातृवर्गस्य। पुनरेकैकस्य भागस्य पञ्चविंशतिर्भागाः कर्त्तव्याः। तेष्वाद्यानां होत्रादीनां द्वादश भागाः, द्वितीयानां षट्, तृतीयानां चत्वारस्तुर्यानां त्रय इत्यर्थः पशुबन्धादौ तु विषमविभागानभिधानात् "समं स्यादश्रुतत्वादिति" न्यायेन समत्वेनैव विभाग इति मन्तव्यम्। स्वकीयकर्मकलापांशकर्तृषु कृतानुसारेण भागो देय इत्याह मनुः "ऋत्विग्यदि वृतो यज्ञे स्वकर्म परिहापयेत्। तस्य कर्मानुरूपेण देयोऽंशः सह कर्तृभिः" इति। सहकर्त्तृभिः सम्भूयकारिभिरित्यर्थः। यद्वा कर्तृभिः सह देयः दक्षिणाकाले देयो यजमानेनेत्यर्थः। अथ वा कर्म परित्यक्तं सह कर्तृभिरित्यर्थः। यदा तु ऋत्विक् कर्मैकदेशं दक्षिणादानानन्तरं त्यजति तदाऽवशिष्टं तद्गणवर्त्तिनां मध्ये सन्निहितेनान्येन कारयेदित्याह स एव "दक्षिणासु च दत्तासु स्वकर्म परिहापयेत्। कृत्स्नमेव लभेतांशमन्येनैव च कारयन्" इति। कर्ममध्ये ऋत्विङ्मरणे कर्त्तव्यमाह नारदः "ऋत्विजां व्यसनेऽप्येवमन्येन कर्म निस्तरेत्। लभेत दक्षिणादानं स तस्मात् सम्प्रकल्पितम्" इति। अन्येन स्वस्वगणमध्यवर्त्तिनां मध्ये प्रत्यासन्नेन, येन केनचिदन्येन कार्यमाणे त्वध्वर्य्वादिसमाख्याबाधापत्तेरिति ध्येयम्। यत्तु शङ्खलिखितयोर्वचनम् "अथ चेदनुप्राप्ते सवने ऋत्विक् म्रियते तस्य सगोत्रोऽथ शिष्यो वा तत्कार्य्यमनुपूरयेत्"। अथ चेदनाप्तस्ततोऽन्यमृत्विजं वृणुयात्" इति। यत्तु बृहस्पतिवचनम्। "एवं क्रियाप्रवृत्तानां यदा कश्चिद्विपद्यते। तद्वस्तुना क्रिया कार्य्या सर्वैर्वा सहकारिभिः" इति। तदेकान्तगणारब्धितत्विक्कर्तृकदर्शपौर्णमासादियागविषयमित्यभिहितं स्मृतिचन्द्रिकायाम्। जीवत्येव तु ऋत्विजि यजमानेन ऋत्विगन्तरकरणे कस्य दक्षिणेति वीक्षायामाह शङ्खः "अथ ऋत्विजि वृते पश्चादन्यं वृणुयात्पूर्वोक्तस्यैव दक्षिणा पश्चादाहूतः किञ्चिल्लभते" इति। यदा त्वकारणमृत्विग् याज्यं त्यजति याज्यो वा ऋत्विजं, तदा तयोर्दण्डमाह मनुः "ऋत्विजं यस्त्यजेद् याज्यो याज्यमृत्विक् त्यजेद् यदि। शक्तं कर्मण्यदुष्टञ्च तयोर्दण्डः शतं शतम्" इति। नारदोऽपि "ऋत्विक् च त्रिविधो दृष्टः पूर्वजुष्टः स्वयंकृतः। यदृच्छया च यः कुर्यादार्त्विज्यं प्रीतिपूर्वकम्। ऋत्विग्याज्यमदुष्टं यस्त्यजेदनपकारिणम्। अदुष्टमृत्विजं याज्यो विनेयौ तावुभावपीति"। ये कृषिसाधने स्वसमानास्तैः सह कृषिः कार्य्येत्याह बृहस्पतिः "वाह्यकर्षकबीजाद्यैः क्षेत्रोपकरणेन च। ये समानास्तु तैः सार्द्धं कृषिः कार्य्या विजानता" इति। वाह्याः लाङ्गलादिवाहकाः बलीवर्दाः। कर्षकाः कृष्यर्थं स्वीकृताः पुरुषाः आदिशब्देन कृषिसाधनानामन्येषां ग्रहणम्। सम्भूयकारिणां कृषकाणां कर्त्तव्यमाह बृहस्पतिः "पर्वते नगराभ्यासे तथा राजपथस्य च। ऊषरं मूषकव्याप्तं क्षेत्रं यत्नेन वर्जयेत्" इति। पर्वते पर्वतसमीपे कल्पतरुकृता तु विवीत इति पठित्वा विवीतशब्देन यवसाद्यर्थं रक्षितः प्रदेश इति व्याख्यातम्। नगराभ्यासे नगरसमीपे। राजपथस्य समीप इति शेषः। एतदुक्तं भवति पर्वताद्यासन्नमनासन्नमपि ऊषरं मूषकव्याप्तञ्च क्षेत्रं वर्जयेदिति। वाह्येष्वपि वर्जनीयानाह स एव "क्षुधार्तवृद्धं क्षुद्रञ्च रोगिणं प्रपलायिनम्। काणं खञ्जञ्च नादद्याद्वाह्यं प्राज्ञः कृषीवलः" इति। काणः एकाक्षः खञ्जः भग्नचरणः। क्वचिदत्रैकस्यैव हानिमाह स एव "वाह्यबीजात्ययाद्यस्य क्षेत्रहानिः प्रजायते। तेनैव सा प्रदातव्या सर्वेषां कृषिजीविनामि"ति। सम्भूयकारिणामिति शेषः। वाह्यबीजग्रहणं कृषिसाधनानामुपलक्षणार्थम्। सम्भूयकारिणां शिल्पिनां स्वरूपं दर्शयंस्तेषां लाभविभागेऽंशपरिकल्पनाप्रकारमाह स एव "हिरण्यकुप्यसूत्राणां काष्ठपाषाणचर्मणाम्। संस्कर्त्ता तत्कलाभिज्ञः शिल्पी प्रोक्तो मनीषिभिः। हेमकारादयो